ॐ

जन्मभूमिर्मे भारतम्

प्रणेता :-

हंसराजः नागरः

एम० ए०।

ॐ

जन्मभूमिर्मे भारतम्

प्रणेता :-

हंसराजः नागरः

एम० ए०।

सर्वाधिकाराः सुरक्षिताः।

प्रथमं संस्करणम्—14-8-1988

प्राप्तिस्थानम्

हंसराजः नागरः

ग्रामः — तिगाँवः 121101

उपमण्डलम् — बल्लबगढ़म्

मण्डलम् — फरीदाबादम्।

(हरियाणा)

मूल्यम्–सप्त रुप्यकाणि

मुद्रकः बादशाह प्रिंटिंग प्रेस

सोही गेट, बल्लबगढ़।

जन्मभूमिर्मे भारतम्

सर्वत्र जन्मभूमेर्मे, भारतस्य यशो भुवि ।
भवतु सर्वदा श्रेष्ठं, भवतः कृपया प्रभोः ।। 1 ।।

भारतं जन्मभूमिर्मे, सर्वदेशेषु शोभते ।
भूलोकेऽस्मिँश्च राणां, मध्यतश्चन्द्रमा यथा ।। 2 ।।

आकृतिर्यस्य शार्दूल, इव भूमौ च वर्तते ।
तद्विख्यातप्रभावाश्च, सर्वदेशेषु विश्रुताः ।। 3 ।।

शान्ति दूतोऽस्ति लोकेऽस्मिन्, तद् जन्म भूमिभारतम् ।
ददाति शान्तिसन्देशं, सर्वविश्वाय सर्वदा ।। 4 ।।

दिल्ली सुराजधानी सा, भारतस्यास्य सुन्दरी ।
स्थिता पावनभूखण्डे, स्वर्गो यथा सुशोभते ।। 5 ।।

उत्तरस्यां दिशायां स, सदा रक्षति भारतम् ।
उच्चतमो हि शैलेषु, हिमालयः शिरोमणिः ।। 6 ।।

दक्षिणस्यां दिशायां च, भारतमहासागरः ।
प्रक्षालयति पूतेन, जलेन चरणौ सदा ।। 7 ।।

सर्वासु दिक्षु सर्वत्र, भारतस्य च सर्वथा ।।
मित्रदेशा, विराजन्ते, पावन इह भूतले ।। 8 ।।

भवन्ति सकला नूनं, सर्वविधाश्च सुख्यतः ।
देशे सर्वेषु भागेषु, भण्डाराः पूरिताः सदा ।। 9 ।।

लोकेऽस्मिन्नाम सर्वत्र, सर्वदेशेषु केवलम् ।
षड् ऋतवो हि जायन्ते, सदैव भुवि भारते ।। 10 ।।

वसन्तर्तु र्यदाऽऽयाति, बहूनि पादपेषु च ।
सर्वेषु चारू पुष्पाणि, विकसन्तीह सर्वतः ॥ 11 ॥

वसन्ते खलु पुष्पाणां, गन्धेन वायुमण्डलम् ।
सकले भारते रम्यं, भवतीह सुगन्धितम् ॥ 12 ॥

समागच्छति वर्षर्तु, भूमौ च तदनन्तरम् ।
आकाशश्छादितः कृष्णै, मेघैः सदा समन्ततः ॥ 13 ॥

निदाघो याति नाशं च, जन्तवश्च प्रहर्षिताः ।
भूमौ वर्षन्ति मेघाश्च, तड़ागा जलपूरिताः ॥ 14 ॥

मेघा गर्जन्ति कृष्णाश्च, दीव्यन्ति चपलाः खलु ।
नृत्यन्ति मयुराः सर्व, आकाशे घनगर्जिते ॥ 15 ॥

शब्दं कुर्वन्ति भेकाश्च, तड़ागेषु समन्ततः ।
यथा रटन्ति वेदाँश्च, वटुका आश्रमेषु वै ॥ 16 ॥

विहरन्ति सदा हंसा, स्तड़ागेषु, प्रहर्षिताः ।
दृश्यं रम्यं च तत्काले, स्वर्गो यथा हि भूतले ॥ 17 ॥

पवित्रायां परं भूमौ, भारतस्य हि केवलम् ।
ऋषीणां च मुनीनां च, जन्मभूमिर्हि वर्तते ॥ 18 ॥

उत्सवानामियं भूमि, र्लोके हि भारतस्य च ।
हर्षोल्लासेन सर्वेऽपि, तान् मानयन्ति मानवाः ॥ 19 ॥

तद्दीपमालिकायां च, तत्र दीव्यन्ति दीपकाः ।
वर्षां कुर्वन्ति रङ्गाणां, होलिकायां परस्परम् ॥ 20 ॥

भगिन्यो भातृहस्तेषु, रक्षा सूत्राणि सर्वदा।
स्वरक्षायै च बध्नन्ति, तद् रक्षाबन्धनोत्सवे ॥ 21 ॥

ऋषिभि र्भुवि वेदाश्च, धर्मशास्त्राणि निश्चयम्
कृतानि प्रथमं तानि, भारते जनहेतवे ॥ 22 ॥

भो मातः सुष्ठु मे सर्वं, शरीरं रचितं त्वया
तत्वैश्च पञ्चभि: पुत्र, स्तेऽहं प्रियतम: सदा ॥ 23 ॥

मया फलानि सर्वाणि, खादितानि तवानघे
अमृतं च जलं पीतं, स्वस्थोऽहं सुष्ठु सर्वथा ॥ 24 ॥

शपाम्यहं सदा प्राणै, र्जन्मभूमे निजैस्तव।
पूर्णरूपेण रक्षा च, करिष्यामि हि शत्रुत: ॥ 25 ॥

सर्वगुणनिधे मात:, सेविष्ये त्वां शुभां सदा।
रचितेन महाभूतै, र्वपुषा निर्भयं ननु ॥ 26 ॥

हिमपातैः शरत्काले, रम्यास्तु पर्वता: सदा।
आच्छादिताश्च ते सर्वे, दृश्यन्ते रक्षका यथा ॥ 27 ॥

हिमालयादिशैलेभ्यो, हिमं भूत्वा जलं खलु,
समागच्छति सर्वासु, नदीषु भारते भुवि ॥ 28 ॥

सर्वा नद्यो भारभूमिं, सिञ्चन्ति सदा विधिना लोके।
येन स्वर्गस्य समानी सा, जाता सम्यक् संसारेऽस्मिन् ॥ 29 ॥

गङ्गा सर्वासु नदीषु शुभा, भूलोकेऽस्मिन् पापघ्ना सा।
या कल्याणं च करोति सदा, जीवानां पायुगे बहुलम् ॥ 30 ॥

गङ्गा यमुना विख्याते स्तो, द्वे नद्यौ भारतदेशेऽस्मिन् ।
हिन्दूनां च पवित्रे तीर्थे, सर्वत्र मते पावनभूमौ ॥ 31 ॥

भारतदेशे बहु विपिनानि, सघनानि विराजन्ते नूनम् ।
चन्दनवृक्षा रूढा येषु, वायुं युक्तं विदधति गन्धैः ॥ 32 ॥

काशीवृन्दावनमथुराद्या, विद्यानिधयो वर्तन्ते खलु ।
आगच्छन्तिच्छात्राः पठितुं, बहवो देशानां सर्वेषाम् ॥ 33 ॥

भारतदेशे सम्यग्, बहवो विद्यालयाश्च वर्तन्ते ।
सर्वे बालाः शिक्षां, निःशुल्कं यत्र च लभन्ते ॥ 34 ॥

सर्वे लोकाः पठिता, भारतभूमौ रताश्च धर्मे ते ।
गुणावत्यो बलवत्यः, सर्वाः कान्ताश्चरितवत्यः ॥ 35 ॥

श्रेष्ठा विद्यानिधियो, वर्तन्ते भारते च निःशुल्कम् ।
शिक्षावासौ श्रेष्ठौ, दीयेते तेषु कृते छात्राणाम् ॥ 36 ॥

विद्यालयेषु देशे, टी० वी० यन्त्राणि सुष्ठु वर्तन्ते ।
तेषु श्रेष्ठा शिक्षा, सर्वेभ्यश्छात्रेभ्यः सुलभा वै ॥ 37 ॥

भारतवर्षः खलु पूर्वास्मात्, कालादस्ति श्रेष्ठतमो वै ।
सर्वेषु च देशेषु च भूमौ, विश्वगुरुर्देशोऽयं तस्मात् ॥ 38 ॥

आर्यावर्ते देशे, मांसं मदिरं न हि ते सेवन्ते ।
कुर्वन्ति स्त्रीपुरुषाः, पोषाहारं जनाः सर्वे ॥ 39 ॥

भूमिरियं सा राधाकृष्णौ, यत्र शुभं रासं लीलां तौ ।
कुवन्तौ कालिन्द्यास्तीरे, सानन्दं कुरुतः स्म विहारम् ॥ 40 ॥

यत्रायोध्यायां त्रेतायां, रामे शासति राज्यं सर्वे ।
लोकास्ते प्रेम्णा सानन्दं, निवसन्ति सदा सा भूमिरियम् ॥ 41 ॥

रात्रिर्धन्या चन्द्रेण यथा, पृथ्वी धन्या सूर्येण यथा ।
धन्या भूमिरियं च तथा सा, तेन दयानन्दस्य च नाम्ना ॥ 42 ॥

अत्रत्या लोकाः खलु सर्वे, दुग्धेन घतेन युतं शुद्धम् ।
भोज्यं च पदार्थं सानन्दं, खादन्ति पुरा वारम्वारम् ॥ 43 ॥

तेषां खलु भारतलोकानां, स्वास्थ्यंपरमं श्रेष्ठं तिष्ठति ।
धीरा वीरा गुणवन्तस्ते, सकलास्तस्माद् भारतभूमौ ॥ 44 ॥

भारतदेशे सर्वे पुरुषाः, नार्यः स्वीये देशेऽद्यत्वे ।
रचितानि च वस्तूनि हि तानि, स्वैरं स्वैरं खलु सेवन्ते ॥ 45 ॥

लोकाः सर्वे भक्ताश्च सदा, स्वीयं देशं प्रति गुणवन्तः ।
धर्मे कुशला वेषोभूषा, तेषां शुद्धा खादोमन्तः ॥ 46 ॥

कान्ताः सर्वा धर्मे च रता, भगवद्वन्मन्यन्ते च पतिम् ।
गीतां रामकथां गायन्ति, प्रातः सायं ध्याने मग्नाः ॥ 47 ॥

ससारे विख्यातं, तुमुल युद्धं पुरा च सञ्जातम् ।
पञ्च सहस्त्रात् पूर्वं, वर्षाणां खलु तथा भूमौ ॥ 48 ॥

श्रुत्वा च कृष्णवचनं, विगतः शीघ्रं वै मोहोऽर्जुनस्य ।
हस्ते धृत्वा चापं, तद् युद्धं तत्र च गतः सः ॥ 49 ॥

गङ्गा पार्श्वे रचिता, तमसा तीरे तपोवने तस्मिन् ।
श्री रामकथा पुण्या, वाल्मीकिमहर्षिणा च पुरा ॥ 50 ॥

बहुकृषि देशो भूमौ, भारतवर्षः सदैव धान्यानाम् ।
श्रेष्ठानां सर्वेषां, उत्पादनमत्र क्रियते कृषकैः ॥ 51 ॥

एकं च कलाकेन्द्रं, श्रेष्ठं भूमौ भारतवर्षस्य ।
मुम्बानगरे ख्यातं, फिल्मानां सुष्ठु विराजते ॥ 52 ॥

बिज्ञानयुगेऽद्यत्वे, सर्वे दिव्यास्तस्य चमत्काराः ।
भारतवर्षे सुखदा, दृश्यन्ते सुष्ठु यन्त्रयुगे ॥ 53 ॥

यन्त्राणि बहूनि सदा, सम्यक् तिष्ठन्ति च सन्देशार्थम् ।
आकाशे शोभन्ते, रोहिण्याद्यानि भद्राणि ॥ 54 ॥

ग्रामेषु पुरेषु सदा, सर्वत्र हि मे सकले देशेऽस्मिन् ।
विद्युद् दीपैः सर्वैं, दीव्यति सततं च भूमिरियम् ॥ 55 ॥

देशे च महोद्योगाः, सर्वे सम्यक् सदा प्रशोभन्ते ।
ग्रामेषु पुरेषु तदा, बहुसंख्याका लघवः पुनः ॥ 56 ॥

वर्षाभावो देशे, प्रभवति च तदा विधिना ऽसंख्यातैः ।
नलकूपैः कृषिकार्यं, सम्पन्नं जायते सुतराम् ॥ 57 ॥

इह कृषिकार्यं सर्वं, ट्रैक्टरयन्त्रैः सदा बलीवर्दैः ।
सार्धं सर्वत्र सदा, भारतदेशे खलु जायते ॥ 58 ॥

अस्माद् हेतोर्देशे, श्रेष्ठं खलु जायते च कृषि कार्यम् ।
सर्वे लोका धनिनः, साधनयुक्ताः सुतरां सम्पन्नाः ॥ 59 ॥

राजपथाः सुष्ठुतरं, भारतदेशे सततं शोभन्ते ।
ग्रामेषु पुरेषु सदा, सर्वत्र हि ते सकलाः संयुक्ताः ॥ 60 ॥

अस्मिन् भारतवर्षे, सततं राजपथेषु च सर्वेषु ।
सुष्ठु परिवहन सेवा, प्रवर्तते लौहमार्गयानानाम् ।। 61 ।।

अत्रत्याः खलु लोका, धनिनः सर्वे सा सुसम्पन्नाः ।
शोभन्ते सर्वेषां, पार्श्वे स्वानि स्वानि च यानानि ।। 62 ।।

सलिलं पेयं देशे, प्रदीयते राज्येषु च सर्वेषु ।
ग्रामेषु पुरेषु सदा, स्वैः स्वैः राज्यैः सर्वविधैर्विधिना ।। 63 ।।

सुभगचिकित्साशाला, भारतभूमौ सततं वर्तन्ते ।
निःशुल्कं सर्वेषां, सेवा सम्यग् विधीयते यासु ।। 64 ।।

पुरुषाः स्त्रियश्च सर्वे, विश्यासं सीमितपरिवारे ते ।
कुर्वन्ति परं पटवो, देशार्थं कल्याणकृते नित्यम् ।। 65 ।।

स्वस्था गुणिनः सर्वे, लोका देशे सदैव विद्यन्ते ।
तस्माद् धनिनो बलिनः, सुखिनः सर्वत्र सदा शोभते ।। 66 ।।

समितिमूल्याः सर्वा, आपणयो बहवो जायन्तेऽस्मिन् ।
याभ्यः समुचितमूल्यैः, वस्तूनि क्रीणते जना नूनम् ।। 67 ।।

सर्वेषां वस्तुनां, मूल्यं न्यूनं सततं भवतहि ।
उत्पादनं च देशे, वृद्धिं प्राप्नोति सदा भूमौ तत् ।। 68 ।।

भारतभूमौ सर्वे, वृद्धा लोकाः खलु लभन्ते ।
वार्धकवृत्तिं सम्यग् धनहीनाः सुष्ठुतरं सदा ।। 69 ।।

स्वस्थाः पशवः सम्यक्, सर्वस्थानेषु देशेऽस्मिन् ।
गावश्च महिष्यो नो, बहुदुग्धाः सर्वदा नाम ।। 70 ।।

अत्र पशूनां हिंसां, कर्तुं देशे खलु निषेधः ।
अपि च खगानां सम्यग्, राज्यानां सर्वकारैश्च ॥ 71 ॥

गौशाला रमणीयाः, समस्त राज्येषु च पशूनाम् ।
विहगानां सुष्ठूतरं, तत्र चिकित्सालया रम्याः ॥ 72 ॥

दुग्धसरितोऽत्र सततं, भारतदेशे प्रवहन्ति ताः ।
दधिपयसी लोकानां, सर्वत्र हि भोजनं श्रेष्ठम् ॥ 73 ॥

चौर्यं कार्यं नासीद्, नाप्युत्कोचः खलु कुत्रचित् ।
लोकाश्च सुखेन सदा, भारतदेशे निवसन्ति ते ॥ 74 ॥

लोका भक्ता सर्वे, भारतवर्षं प्रति सर्वदा ।
कुर्वन्ति परं मानं, सम्मानं ते च पदे पदे ॥ 75 ॥

धीरा वीराः सकला, लोकाः कार्येषु ननु सर्वे ।
धर्मेषु सत्सु सम्यग् धर्मिष्ठास्ते जना नितराम् ॥ 76 ॥

सर्वे सनेहेन जनाः सर्वत्र सदा वसन्ति हि ते ।
भिन्ने भिन्ने राज्ये सर्वमतानामवलम्बिनः ॥ 77 ॥

भारत देशे बहवो, भाषाः प्रचलन्ति किल रम्याः ।
तासु च संस्कृत भाषा, जननी च समस्तभाषाणाम् ॥ 78 ॥

भारतवर्षे त्रिविधाः सेना, वर्तन्ते सुष्ठुतरं सर्वाः ।
स्थलसेना जलसेना श्रेष्ठा, वायुगसेना रक्षायै च ॥ 79 ॥

आकाशे गत्वा तत्सेना, देशस्य च रक्षां कर्तुं सा ।
शत्रूणामाक्रमणं सम्यग् विफली कुरुते शक्तिमती किल ॥ 80 ॥

भारतभूमौ स्थलसेना सा, श्रेष्ठा सबला ननु सर्वविधा ।
बम्बादिभिराक्रमणं सततं, स्वबलेन करोति सदा नष्टम् । 81 ।

जलसेना सुष्ठुतरं सिन्धौ स्थित्वा देशस्योपरि कष्टम् ।
नष्टं कुरुते विधिना सकलं, रक्षार्थे ननु भारतभूमेः ॥ 82 ॥

गृहरक्षिबलं च सदा सर्वं, श्रेष्ठं रम्यं भारतदेशे ।
तस्मान्न कदाऽपि भवति युद्धं सर्वो देशः स्वर्गेण समः ॥ 83 ॥

त्रिविधा न्यायालयाश्च देशे, सर्वे न्यायं कुर्वन्ति शुभम् ।
ते सुष्ठुतरं न्यायाध्यक्षा, निष्पक्षं सर्वेषां विधिना ॥ 84 ॥

एको न्यायाधीशः श्रेष्ठ, स्तद्मण्डलके हि भवति सम्यक् ।
न्यायं करोति तल्लोकानां, सर्वेषां निष्पक्षं नित्यम् ॥ 85 ॥

राज्ये न्यायाधीशश्च सदा, न्यायं करोति खलु सर्वविधम् ।
अभियोगं श्रुत्वा लोकानां सम्यक् स्थित्वा न्यायस्थाने ॥ 86 ।

न्यायस्थान सर्वोच्चतमं, भारतदेशे च भवत्यैकम् ।
अन्ते तस्मात् प्राप्तो न्यायः तर्वैमान्यः खलु भवति सदा । 87 ।

अद्यत्वे पञ्चायत्ताकानां, न्यायो ग्रामे खलु विख्यातः ।
मुक्तन्यायो भारतवर्षे, ऽपि सुचलितो लोकानां च कृते । 88 ।

योद्धाश्च लोकाः सततं हि देशे, रक्षासुकार्येषु रताश्च सर्वे ।
सम्यग् भवन्तीह सदैव रक्षां, कुर्वन्ति सर्वे विधिभिश्च भूमेः । 89 ।

सर्वे च विप्राः खलु जन्मभूमौ, पारङ्गताः सुष्ठुतरं बुधास्ते ।
ज्ञानस्य दाने खलु तत्परा वै, सर्वप्रकारेण हिते जनानाम् ।90 ।

वैश्याश्च सर्वे सुतरां स्वदेशे, भक्ताश्च देशस्य सदा च सम्यक् ।
काले विपतेर्ददते स्ववित्तं, रक्षां च कर्तुं हि सदा स्वभूमेः । 91 ।

सदैव देशे च सुखेन लोका, निर्जेमतैः सुष्ठुतया हि सर्वे ।
सुयोग्यनेतुश्चयनं च सवँ, सुकुर्वते नाम विधिं प्रपाल्य । 92 ।

दलाश्च देशे बहवश्च सर्वे, निजाश्च हेयाः खलु भावनाश्च ।
हिताय देशस्य सुखेन हित्वा, सदा हि रक्षन्ति च लोकतन्त्रम् 93

जनाश्च सर्वे हि सदा समानाः बिधानदृष्टौ विधिना च देशे ।
प्रदीयते यत्र निजाधिकारो, जनाय सर्वत्र च भारते वै ।। 94 ।।

विख्यातेषु स्थानेषु सदा, भारतभूमौ च खलु रक्तदुर्गः ।
ताजमहलश्च नाम्ना सुतरां संसारेऽस्मिन् ख्यातो श्रेष्ठो । 95 ।

अमर शहीदानां भक्तानां, पूज्येषु समाधिषु सर्वेषाम् ।
अमरज्योति प्रज्वलति सदा, पुष्पानि समर्पयन्ति लोकाः । 96

देशे वर्तन्त आर्दशाः, सर्त्र भूतेषु चात्मवत् ।
धर्मश्च परमोऽहिंसा, वसुधैव कुटुम्बकम् ।। 97 ।।

गान्धिस्वप्ना रामराज्यस्य सर्वे दृश्यन्ते वै भारतस्यास्य भूमौ ।
साकारास्ते सुप्रकारेण रम्याः सर्वेषां नो भद्रहेतौ जनानाम् 98

स्वर्गादपि श्रेष्ठतरं च लोके, सुजन्मभूमिः खलु भारतं मे ।
तस्मै च देवा अपि सुष्ठु मूर्ध्ना, नमन्ति सर्वे शुभजन्मभूमिम् 99

सुखदा वरदा धनदा, माता भूमिर्मे कल्याणी सा ।
वन्देऽहं शिरसा तां, श्रद्धाभावेन शतं शतम् । 100 ।

जयतु जयतु रम्यो मे सदैव स्वदेशः,
जयतु जयतु रम्यं मे सदा भारतं तत् ।
जयतु जयतु रम्या मे सदा मातृभूमिः,
जयतु जयतु रम्या मे सदा जन्मदात्री । 101 :

इति हंसराजनागरप्रणीतं जन्मभूमिर्मे भारतम् ।

कवि परिचयः

भारतवर्षे रम्ये, विराजते हरियाणां प्रान्तोऽयम् ।
तत्र तिगांवो ग्रामः, सुफरीदाबादमण्डलके ॥ 1

स्वर्गेण समे ग्रामे, श्री कुन्दनसिंहनामकः कृषकः।
गूर्जरवंशे निवसति, युक्तः सकलैर्गुणैर्नित्यम् ॥ 2

तस्य हरकौरदेवी, धर्मपरायणभार्या सा सत्या ।
द्वे कन्ये पुत्रा वै, त्रयश्च सततं सुशोभन्ते ॥ 3

पुत्रेषु सदा जेष्ठः, श्री बुद्धनसिंहो भक्तः श्रेष्ठः ।
धर्मिष्ठो नित्यं वै, सत्कार्येषु प्रवीणश्च ॥ 4

सा तस्य धर्मपत्नी, पूज्या गोपालो देवी सत्या ।
कन्ये पञ्च सुपुत्रा जेष्ठो हंसः कवि नागर ॥ 5

तिस्त्रः कन्याः पुत्रा स्त्रयश्च सर्वैर्गुणैश्च संयुक्ताः ।
शीला देवी पत्नी, तस्य सधर्मा गुणज्ञा सा ॥ 6

प्राध्यापन शिक्षायां, वरि० मा० विद्या० हरियाणाप्रान्ते ।
ग्रन्थस्यास्य च कर्त्ता, स हंसराजो ननु नागरः ॥ 7

पूर्व प्रकाशितानि पुस्तकानि :

	मूल्यम्
1. गुरु प्रशस्तिः	3/-
2. ईशस्तुतिः	3/-
3. यज्ञ महिमा	3/-
4. गायत्रीस्तुतिः	3/-
5. सरस्वती वन्दना	3/-
6. जन्मभूमिर्मे भारतम्	7/-

अप्रकाशिताः रचनाः :

7. षब्दनिर्वचनम्
8. व्यवहारिक संस्कृत शब्द कोषः
9. हरियाणा गौरवम्
10. गान्धिस्वराज्यम्
11. गुरुविरजानन्द चरितम्